योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः २९

श्रीवसिष्ठ उवाच ।

अथ वर्षसहस्रेण दिव्येनासुरपुङ्गवः ।

देवदुन्दुभिनिर्घोषैर्बुबुधे भगवान्बलिः ।। १

बलौ प्रबुद्धे तद्बालं विरेजे नगरं तदा ।

वैरिञ्च इव सूर्यौघ उदिते कमलाकरः ।। २

बलिः प्रबुद्ध एवासौ यावन्नायान्ति दानवाः ।

तावत्संचिन्तयामास समाधिसदने क्षणम् ।। ३

अहो नु रम्या पदवी शीतला पारमार्थिकी ।

अहमस्यां क्षणं स्थित्वा परां विश्रान्तिमागतः ।। ४

तदेतामेव पदवीमवलम्ब्य करोम्यहम् ।

भवतीहोपभुक्ताभिः किं मे बाह्यविभूतिभिः ।। ५

ऐन्दवेष्वपि विश्वेषु न तथानन्दवीचयः ।

तोषयन्ति यथान्तर्मे संसिद्धिभवभूतयः ।। ६

इति भूयोऽपि विश्रान्त्यै कुर्वाणं गलितं मनः ।

बलिमावारयामासुर्दैत्याश्चन्द्रमिवाम्बुदाः ।। ७

तानालोक्य पुनर्दध्यौ तत्प्रणामाकुलेक्षणः ।

तैः कुलाचलसंकाशैः परिवीतवपुस्त्विदम् ।। ८

चितः क्षीणविकल्पस्य किमुपादेयमस्ति मे ।

मनस्तदभिपातित्वाद्याति तद्रसतामलम् ।। ९

मोक्षमिच्छाम्यहं कस्माद्बद्धः केनास्मि वै पुरा ।

अबद्धो मोक्षमिच्छामि केयं बालविडम्बना ।। 5.29.१०

न बन्धोस्ति न मोक्षोस्ति मौर्ख्यं मे क्षयमागतम् ।

किं मे ध्यानविलासेन किं वा ध्यानेन मे भवेत् ।।११

ध्यानाध्यानभ्रमौ त्यक्त्वा पुंस्त्वं स्वमवलोकयत् ।
यदायाति तदायातु न मे वृद्धिर्न वा क्षयः ।। १२
न ध्यानं नापि वाऽध्यानं न भोगान्नाप्यभोगिताम् ।
अभिवाञ्छामि तिष्ठामि सममेव गतज्वरः ।। १३
न मे वाञ्छा परे तत्त्वे न मे वाञ्छा जगत्स्थितौ ।
न मे ध्यानदशाकार्यं न कार्यं विभवेन मे ।। १४
नाहं मृतो न जीवामि न सन्नासन्न सन्मयः ।
नेदं मे नैव चान्यन्मे नमो मह्यमहं बृहत् ।। १५
इदमस्तु जगद्राज्यं तिष्ठाम्यत्र तु संस्थितः ।
नेह वास्तु जगद्राज्यं तिष्ठाम्यात्मनि शीतलः ।। १६
किं मे ध्यानदृशा कार्यं किं राज्यविभवश्रिया ।
यदायाति तदायातु नाहं किंचन मे क्वचित् ।। १७
न किंचिदपि कर्तव्यं यदि नाम मयाधुना ।
तत्कस्मान्न करोमीदं किंचित्प्रकृतकर्म वै ।। १८
इति निर्णीय पूर्णात्मा बलिर्ज्ञानवतां वरः ।
दैत्यानालोकयामास पद्मानीव दिवाकरः ।। १९
दृष्टिपातविभागेन सर्वेषां दनुजन्मनाम् ।
शिरःप्रणामाञ्जग्राह पुष्पामोदानिवानिलः ।। 5.29.२०
अथ वैरोचनिस्तत्र ध्येयत्यागमयात्मना ।
मनसा सकलान्येव राजकार्याणि संव्यधात् ।। २१
द्विजान्देवान्गुरूंश्चैव पूजयामास पूजया ।
संमानयामास सुहृद्बन्धुसामन्तसज्जनान् ।। २२
अर्थेनापूरयामास भृत्यानर्थिगणांस्तथा ।
ललना लालयामास विचित्रविभवार्पणैः ।। २३
इत्यसौ ववृधे तस्मिन्राज्ये सकलशासने ।
यज्ञं प्रति बभूवाथ मतिरस्य कदाचन ।। २४

तर्पिताशेषभुवनं देवर्षिगणपूजितम् ।

सह शुक्रादिभिर्मुख्यैः स चकार महामखम् ।। २५

बलिर्भोगभरस्यार्थी नेति निर्णीय माधवः ।

बलेरीहितसिद्ध्यर्थं सिद्धिदस्तन्मखं ययौ ।। २६

भोगैककृपणायेदं जगज्जङ्गलखण्डकम् ।

दातुं शोच्याय शक्राय वयोज्येष्ठाय कार्यवित् ।। २७

क्रममाणो बलेनात्र वञ्चयित्वा बलिं हरिः ।

बबन्ध पातालतले भूगेह इह वानरम् ।। २८

अद्यासौ संस्थितो राम पुनरिन्द्रत्वहेतुना ।

जीवन्मुक्तवपुः स्वस्थो नित्य ध्यानविषण्णधीः ।। २९

पातालकुहरे तिष्ठञ्जीवन्मुक्तमतिर्बलिः ।

आपदं संपदं दृष्ट्या समयैव स पश्यति ।। 5.29.३०

नास्तमेति न चोदेति तत्प्रज्ञा सुखदुःखयोः ।

समा स्थिरकरा चित्रलेख्या सूर्यावलिर्यथा ।। ३१

आविर्भावतिरोभावसहस्त्राणीह जीवताम् ।

तन्मनश्चिरमालोक्य भीमेषु विरतिं गतम् ।। ३२

दशकोटीश्च वर्षाणामनुशास्य जगत्त्रयम् ।

अन्ते विरक्ततां प्राप्तमुपशान्तं बलेर्मनः ।। ३३

ऊहापोहसहस्राणि भावाभावशतानि च ।

बलिना परिदृष्टानि क्व समाश्वासमेत्यसौ ।। ३४

भोगाभिलाषं संत्यज्य बलिः संपूर्णमानसः ।

आत्मारामस्थितो नित्यं मध्ये पातालकोटरे ।। ३५

पुनरेतेन बलिना जगदिन्द्रतयाखिलम् ।

अनुशास्यमिदं राम बहून्वर्षगणानिह ।। ३६

न तस्येन्द्रपदप्राप्त्या तुष्टिः समुपजायते ।

न तस्य स्वपदभ्रंशादुद्वेग उपजायते ।। ३७

समः सर्वेषु भावेषु सर्वदैवोदिताशयः ।

संप्राप्तमाहरन्स्वस्थ आकाश इव तिष्ठति ।। ३८

बलेर्विज्ञानसंप्राप्तिरेषा ते कथिता मया ।

एतां दृष्टिमवष्टभ्य त्वमप्यभ्युदितो भव ।। ३९

बलिवत्प्रविवेकेन नित्योऽहमिति निश्चयात् ।

पदमासादयाद्वैतं पौरुषेणैव राघव ।। 5.29.४०

द्वे चाष्टौ चैव वर्षाणां कोटीर्भुक्त्वा जगत्त्रयम् ।

अन्ते वैरस्यमापन्नो बलिरप्यसरोत्तमः ।। ४१

तस्मादवश्यवैरस्यं भोगभारमरिंदम ।

संत्यज्य सत्यमानन्दमवैरस्यं पदं व्रज ।। ४२

इमा दृश्यदृशो राम नानाकारविकारदाः ।

नेह कान्ततया ज्ञेया दूराच्छैलशिला इव ।। ४३

धावमानमिहामुत्र लुठितं लोकवृत्तिषु ।

संस्थापय निबद्ध्वैतच्चेतो हृदयकोटरे ।। ४४

चिदादित्यो भवानेव सर्वत्र जगति स्थितः ।

कः परस्ते क आत्मीयः परिस्खलसि किं मुधा ।। ४५

त्वमनन्तो महाबाहो त्वमाद्यः पुरुषोत्तमः ।

त्वं पदार्थशताकारैः परिस्फूर्जसि चिद्वपुः ।। ४६

त्वयि सर्वमिदं प्रोतं जगत्स्थावरजंगमम् ।

बोधे नित्योदिते शुद्धे सूत्रे मणिगणा यथा ।। ४७

न जायसे न म्रियसे त्वमजः पुरुषो विराट् ।

चिच्छुद्धा जन्ममरणभ्रान्तयो मा भवन्तु ते ।। ४८

समस्तजन्मरोगाणां प्रविचार्य बलाबलम् ।

तृष्णामुत्सृज्य भोगानां भोक्तैव भव केवलम् ।। ४९

त्वयि स्थिते जगन्नाथे चिदादित्ये सदोदिते ।

इदमाभासते सर्वं संसारस्वप्नमण्डनम् ।। 5.29.५०

मा विषादं कृथा व्यर्थं सुखदुःखैषणा न ते ।
शुद्धचित्तोऽसि सर्वात्मा सर्ववस्त्ववभासकः ।। ५१
पूर्वमिष्टमनिष्टं त्वमनिष्टं चेष्टमित्यपि ।
परिकल्प्य तदभ्यासात्तत्ततोऽपि परित्यज ।। ५२
इष्टानिष्टदृशोस्त्यागे समतोदेति शाश्वती ।
तया हृदयवर्तिन्या पुनर्जन्तुर्न जायते ।। ५३
येषु येषु प्रदेशेषु मनो मज्जति बालवत् ।
तेभ्यस्तेभ्यः समाहृत्य तद्धि तत्त्वे नियोजयेत् ।। ५४
एवमभ्यागताभ्यासं मनोमत्तमतंगजम् ।
निबध्य सर्वभावेन परं श्रेयोऽधिगम्यते ।। ५५
मा शरीरयथार्थज्ञैर्मिथ्यादृष्टिहताशयैः ।
धूर्तैः संकल्पविक्रीतैर्विमूढैः समतां व्रज ।। ५६
अकिंचनात्स्वनिर्णीतौ लम्बमानात्परोक्तिषु ।
न मौर्ख्यादधिको लोके कश्चिदस्तीह दुःखदः ।। ५७
त्वमेतदविवेकाब्भ्रमुदितं हृदयाम्बरे ।
विवेकपवनेनाशु दूरं नय महामते ।। ५८
आत्मनैव प्रयत्नेन यावदात्मावलोकने ।
न कृतोऽनुग्रहस्तावन्न विचारोदयो भवेत् ।। ५९
वेदवेदान्तशास्त्रार्थतर्कदृष्टिभिरप्ययम् ।
नात्मा प्रकटतामेति यावन्न स्वमवेक्षितम् ।। 5.29.६०
त्वमात्मन्यात्मना राम प्रसादे समवस्थितः ।
प्राप्तोऽसि विततं बोधं मद्वचस्येव बुध्यसे ।। ६१
विकल्पांशविहीनस्य त्वयैषा चिद्विवस्वतः ।
गृहीता वितता व्याप्तिर्मदुक्त्या परमात्मनः ।। ६२
विलीनसर्वसंकल्पः शान्तसंदेहविभ्रमः ।
क्षीणकौतुकनीहारो जातोऽसि विगतज्वरः ।। ६३

यदुपगच्छसि पासि निहंसि वा

पिबसि विस्मयसे च विवर्धसे ।

तदपि तेन तदास्तु यदा मुने

विगतबोधकलङ्कविशङ्कितः ।। ६४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० उपशमप्रकरणे बलेर्विज्ञानप्राप्तिर्नामैकोनत्रिंशः सर्गः ।। २९ ।।